International Journal of Sanskrit Research 2019; 5(3): 163-167

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(3): 163-167
© 2019 IJSR
www.anantaajournal.com
Received: 17-03-2019
Accepted: 28-04-2019

**डॉ. एम. किषन्**
सहायकाचार्यः, संस्कृतविभागः, दिल्लीविश्वविद्यालयः, दिल्ली, भारत

**डॉ. उमाशंकरः**
सहायकाचार्यः, संस्कृतविभागः, दिल्लीविश्वविद्यालयः, दिल्ली, भारत

**Correspondence**
**डॉ. एम. किषन्**
सहायकाचार्यः, संस्कृतविभागः, दिल्लीविश्वविद्यालयः, दिल्ली, भारत

# काव्यशास्त्रेषु रसमयं लोकजीवनम्

## डॉ. एम. किषन्, डॉ. उमाशंकरः

**मुख्यविषयः-**
प्रपञ्चजीवनपद्धतिः रसानन्दभरितजीवनं कथमिति जिज्ञासायां केवलं सनातनधर्मकारणादेव समाजश्रेयो भवतीति ज्ञायते। ऋग्वेदादारभ्य लौकिकशास्त्रपर्यन्तं “परोपकारपुण्याय, पापाय परपीडनम्” इति तथा “शरीरमाद्यं खलु धर्मसाधनम्” इति महापुरुषोक्त्यानुसृत्य काव्यशास्त्रेषु रसमयधार्मिकलोकजीवनं भविष्यतीति निरूपितम्।

**कूटशब्दः** सनातनधर्मः, काव्यप्रयोजनम्, धार्मिकजीवनपद्धतिः, वागर्थौ

**उत्तमकाव्यपरिचयः**

काव्यशास्त्रविनोदेन कालोगच्छति धीमताम्।
व्यसनेन च मूर्खानां निद्रया कलहेन वा॥ [i]

काव्यशास्त्रेषु रसानान्दमुत्पद्यतेति ज्ञायतेव । रसमित्युक्ते “रस्यते इति रसः”, ‘रस्यते आस्वाद्यतेति रसः’ रसशब्दस्य व्युत्पत्तिः दृश्यते । नाट्यशास्त्रे रसाध्याये रसतत्त्वानि भरतमुनिना उदाहृताः ।

रसा भावा ह्यभिनया धर्मी वृत्तिप्रवृत्तयः ॥
सिद्धिः स्वरास्तथातोद्यं गानं रंगश्च संग्रहः ॥ [ii]

साहित्यपटनविनोदकारणेन समस्तमानवाली, सहृदयप्रेक्षकाः रसानुभूतिद्वारा चेतनसत्त्वाः भवन्तीति। तादृश अलौकिकानन्देन ऐहिकामुश्मिकफलसिद्धिं प्राप्य मोक्षमार्गमनुसरतीति ज्ञायते ।
धर्मार्थकाममोक्षाः चत्वारः पुरुषार्थाः प्रसिद्धाः एव। ते एव पुरुषार्थाः जीवितावधेः साफल्यं परिकल्प्यमानवकृतार्थं कुर्वन्तः। पुरुषार्थज्ञाने वेदाः शास्त्राणि दर्शनानि इत्यादीनां सर्वेषाम् उपयोगोदृष्टः।

किन्तु शास्त्राणां मध्ये केचन साहित्यविदः अलंकारशास्त्रमपि पठितुमिच्छन्ति। किन्नामशास्त्रमिति चेत् "शास्तिइतिशास्त्रम्" ज्ञायते अनेन इति वा। एवं सति साहित्यशास्त्रं किमनुशास्ति किं तेन सामाजिकप्रयोजनमिति निरूपयितुं यत्नलेशः क्रियते। "सहितयोः शब्दार्थयोः अनेनइतिसाहित्यम्" इति साहित्यशब्दव्युत्पत्यनुसारं सहितात् प्रवृत्तिः अहितात् निवृत्तिरेव रामादिवत् प्रवर्तितव्यं न तु रावणादिवदिति साहित्यम्।[iii]
तथैव कविशिरोभूशनमलंकारशास्त्रे संज्ञा परिच्छेदे “विश्वश्रेयः काव्यम्” इति कव्यलक्षणसंदर्भे एवं पौरुषेयमपौरुषेयं वाक्यं शासनाच्छास्त्रमित्युच्यते प्रभंजनं अहोभिलपतिना । यथा-

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।
पुंसां येनोपदिश्येत तत्शास्त्रमभिधीयते॥

एवंविधेलक्षणसम्पन्ने शास्त्रे साहित्यशास्त्रस्यापिशास्त्रत्वंकथंसंगच्छते? काव्यमीमांसायां - "पञ्चमीसाहित्यविद्या" इतियायावरीयः।
अलंकारशास्त्रे दृष्टं सामाजिकप्रयोजनं काव्यैः एव सिध्यतीति अलंकारिकैरेव प्रथमं सिद्धान्तितम्। ततः प्राक् "काव्यालापान् च वर्जयेत्" इति निषेधोपि श्रूयते। सनसमीचीनःइति भामहःप्रथममुक्तवान्।

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिबन्धनम्॥ [iv]

काव्येषु पुरुषार्थज्ञानसम्पन्नं भवतीति आलंकारिकाः एव पाठकान् काव्यासक्तान् कृतवन्तः। अपि च वेदेषु पुराणेषु शास्त्रेषु च यो यो विषयः पुरुषार्थविषयकः प्रतिपादितः तेसर्वेऽपिकाव्यात्ग्राह्य एवेति विद्यानाथेन प्रतापरुद्रीये स्पष्टं निरूपितम्।

यद्वेदात्प्रभुसम्मितादधिगतंशब्दप्रधानाच्चिरं
यच्चार्थप्रवणात्पुराणवचनादिष्टंसुहृत्सम्मितात्।
कान्तासंमितयाययासरसतामापाद्यकाव्यश्रिया
कर्तव्येकुतुकीबुधोविरचितस्तस्यैस्पृहांकार्मुके॥ [v]

एवं काव्यप्रकाशकारोऽपि काव्यप्रयोजनानि उक्त्वा काव्यस्य षट्प्रयोजनानि दर्शितवान्। "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" माकुर्यान्निष्फलंकर्म" इति स्मृति वचनात्भीतः सत्पुरुषः काव्यपठनाद् विमुखो मा भूदिति मम्मटेन एवं सिद्धान्तितम्। सत्काव्यानि सर्वाणि सामाजिक श्रेयः साधयितुमेव प्रवर्तितानि अत एव कव्यप्रयोजनानि विशदयता मम्मटाचार्येण भणितम्-

काव्यंयशसेऽर्थकृतेव्यवहारविदेशिवेतरक्षतये।
सद्यःपरनिर्वृत्तयेकान्तासंमिततयोपदेशयुजे॥ [vi]

तत्रैकेन कविना काव्यात् किं प्रयोजनं लब्धम्इति मम्मटेनप्रतिपादितत्वादेव समाजः काव्यप्रयोजनं ज्ञातुं प्रभवति। एवं प्रकारेण आचार्यजगन्नाथेन गद्यरूपेन कव्यप्रयोजनं महत्त्वं च उक्तम् –

"तत्रकीर्तिपरमाह्लादगुरुराजदेवताप्रसादाद्यनेकप्रयोजन कस्यकाव्यस्यव्युत्पत्तेःकविसहृदययोरावश्यकतयागुणालं कारादिभिर्निरूपणीयेतस्मिन्विशेष्यताऽवच्छेदकंतदितर भेदबुद्धौसाधनंचतल्लक्षणंतावन्निरूप्यते" इतिकाव्यम्। [vii]

धर्मपुरुषार्थविषयकाः बहवोविषयाः काव्येषुउदाहृताः अलंकारग्रन्थेषु उद्धृताः। धर्मविषयकाश्च रघुवंशे, कुमारसंभवेप्रसिद्धाः। अर्थविषयकाः शिशुपालवधकाव्ये, किरातार्जुनीये च दृष्टाः। कामाश्च कीदृशाः सेव्याः इत्यपि नैषधे-उत्तररामचरितादौ निरूपित पूर्व एव। या च शिवेतरक्षितः अर्थात् अशुभनिवारणं तस्योदाहरणं अपिकाव्येषु दृश्यते। आदित्यादेः मयूरादीनामिव अनर्थवारणम् इतिनिरूप्यते। मम्मटेन तदपि स्थापितम्। मयूरः कटुव्याधिपीडितः सूर्यम् आराध्य उल्लासोऽभूदिति, लोके सिद्ध एव। तन्निरूपकश्च कश्चन श्लोकः **सूर्यशतके** एव दृश्यते।

शीर्णघ्राणाङ्घ्रिपाणीन्व्रणिभिरपघनैर्घर्घराव्यक्तघोषान्
दीर्घाघ्रातानघौघःपुनरपिघटत्येकउल्लाघयन्यः।
घर्मांशोस्यस्तस्यवोडान्तर्द्विगुणघनघृणानिघ्ननिर्विघ्नवृत्ते -
दत्तर्घाःसिद्धसंघैर्विदधतुघृणयःशीघ्रमहोविघातम्॥[viii]

एवं मूककविरपि कामाक्षीमूक पञ्चाशत्याप्रसाद्यवाग्मी बभूव मोक्षः तावत्सर्वैः अप्राप्य निर्वृत्तिः मोक्षेणैव लभ्यामोक्षश्च आनन्दरूपः "रसो वै सः रसं हि एवायं लब्ध्वानन्दी भवति" इति।[ix]

उपनिषत्सु बहुधा तत्स्वरूपं निरूपितम्। आलंकारिकाः रससिद्धान्तं प्रतिपाद्यतसदृशः आनन्दः सामान्येनापि प्राप्य इति रससिद्धान्तेन निरूपितवन्तः। प्रथमं भरतमुनिः नाट्यशास्त्रे नाट्यवेदस्योत्पत्तिं प्रयोजनं च निरूपितवान्। अलंकारशास्त्रमपि प्रकारान्तरेण नाट्यशास्त्रस्य अंगभूतमेव। सर्वेदेवाः दुःखार्तानां शोकार्तानां च श्रमवारणार्थं यत्किञ्चित्साधनं देयमिति ब्रह्माणं प्रार्थितवन्तः ततो ब्रह्मास्वयं ईश्वरादधिगतं नाट्यं तेभ्यः अनुगृहीतवान्। नाट्यवेदंचपञ्चमंवेदमिति भरतेनस्पष्टमुक्तम्। यथा वेदशाखाः ऋषीणां मध्ये प्रविभक्ताः तथैव नाट्यशाखाः अपि ऋषीणां मध्ये ब्रह्मैव विभज्य दत्तवान्।

महेन्द्रप्रमुखैर्देवैरुक्तःकिलपितामहः।
क्रीडनीयकमिच्छामोदृश्यंश्रव्यंचयद्भवेत्॥
नवेदव्यवहारोऽयंसंश्राव्यःशूद्रजातिषु।
तस्मात्सृजापरंवेदंपञ्चमंसार्ववर्णिकम्॥ [x]
जग्राहपाठ्यमृग्वेदात्सामभ्योगीतमेवच।

चतुर्वेदसारमेव नाट्यं पञ्चमवेदमिति अस्मिन् श्लोके प्रतिपादितः ।

जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान्रसानाथर्वणादपि॥
वेदोपवेदैःसम्बद्धोनाट्यवेदोमहात्मना।
एवंभगवतासृष्टोब्रह्मणाललितात्मकम्॥ [xi]

प्रथमं भरतेनैव सामाजिकानन्ददायकरूपः मोक्षानन्दसदृशस्य रसस्य लक्षणं निरूपितम्। तद्रसानेव तावदभिव्याख्यास्यामः, नहि रसादृते कश्चिदर्थः प्रवर्तते। "विभावानुभावव्यभिचारिसंयोगात्रसनिष्पत्तिः" इति।[xii] तत्र साक्षात् वेदसारसम्पन्नं सर्वशास्त्रोपकारकं नाट्यशास्त्रं नाट्यवेदं पंचमवेदं सर्वोपकारकं इतिहासमित्युच्यते।

सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रवर्थकम्।
नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम्।। [xiii]

आनन्दवर्धनः ध्वन्यालोके वैय्याकरणोक्तं स्फोटसिद्धान्तम् अनुसृत्यैव व्यञ्जनावृत्तिनिरूपणं कृतवान्। तन्मतानुसारिभिः अन्यैरपि मम्मटादिभिःभरतोक्तं लक्षणमेव बहुधा व्याख्यातम्।

उत्तमाधममध्यानां नराणां कर्मसंश्रयम्।
हितोपदेशजननं धृतिक्रीडासुखादिकृत्।।
एतद्रसेषु भावेषु सर्वकर्मक्रियास्वथ।
सर्वोपदेशजननं नाट्यं लोके भविष्यति।। [xiv]

सर्वशास्त्रोपकारकं हितकारिणी लोकोपदेशजनकं धर्मबद्धं नाट्यशास्त्रमाहात्म्यं एवं अभिवर्णितं भरतमुनिना ।

धर्म्यं यशस्यमायुश्यं हितं बुद्धिविवर्धनम्।
लोकोपदेशजननं नाट्यमेतद्भविष्यति।।
न तद् ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते।। [xv]

रसगंगाधरकर्ता जगन्नाथः रसस्वरूपं व्याख्याय "रसो वै सः" इति उपनिषद्वाक्यं साहित्यशास्त्रेपि अन्वेति। काव्यरसप्राप्यानन्दः सहृदयप्रत्यक्षजन्यः सर्वेषामानन्ददायकः इति अलंकारशास्त्रस्य मुख्यंप्रयोजनं रससिद्धिरिति साहित्यशास्त्रेण सिद्धं सामाजिकं प्रयोजनं स्पष्टमुक्तवान्। काव्यलक्षणमाह - "रमणीयार्थप्रतिपादकःशब्दःकाव्यम्" इति [xvi]
रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता। लोकोत्तरत्वं चाह्लादगतश्चमत्कारत्वापरपर्यायोऽनुभवसाक्षिको जातिविशेषः। तथैव अतरसानन्दं मोक्षस्वरूपमेव यथा – आनन्दाद्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्तीति।[xvii]
वस्तुतस्तु वक्ष्यमाणश्रुतिस्वारस्येन रत्याद्यवच्छिन्नाभग्नावरणाचिदेवरसः। सर्वथैव चास्यविशिष्टात्मनो विशेषणं विशेष्यं वाचिदंशमादाय नित्यत्वं स्वप्रकाशकत्वं च सिद्धम्। रत्याद्यंशमादायत्वमित्यत्वमितरभास्यत्वं च। चर्वणाचास्य चोद्भतावरणाभंग एव, प्रयुक्ता तदाकाशान्तःकरणवृत्तिर्वा। इयं च परब्रह्मास्वादात्समाधेर्विलक्षणाविभावादिविषयसंवलितचिदानन्दालम्बनत्वात्। भाव्याचकाव्यव्यापारमात्रात् यथास्यां सुखांशमाने किं मानमिति चेत्समाधानमपि तदभावे किं मानमिति पर्यनुयोगस्य तुल्यत्वात्सुखामात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् इत्यादि शब्दोऽस्ति तत्रमानमिति चेदस्त्यत्रापि "रसो वै सः रसं ह्येवायं लब्धानन्दी भवति" इतिश्रुतिः। सकलहृदयप्रत्यक्षं चेति प्रमाणद्वयम्।

येयं द्वितीयपक्षे तदाकारचित्तवृत्यात्मिका रसचर्वणोपन्यास्तासा शब्दव्यापार भाव्यत्वाच्छब्दी। अपरोक्षसुखलम्बनत्त्वाचापरोक्षात्मिकातत्त्वं वाक्यजबुद्धिवत् इत्याहुरभिनवगुप्ताचार्यपादाः।

इत्याद्यालंकारिकवचनप्रमाण्यात् काव्यस्य अनेक श्रेयसाधनतां ‘कव्यालापंश्च वर्जयेत्’ इत्यस्य “निषेधशास्त्रस्य असत्काव्य विशयतां च पश्यन् रघुवंशाख्यं स्वयं महाकाव्यं चीकीर्शुः”-इति.

यानि च काव्यानि केवलं भोगैकलालसतां वितन्वते, असन्मार्गमनुमन्यन्ते,कर्तव्यं विस्मारयन्ति, हिंसा प्रेरयन्ति,त्यागाद्युदात्तगुणानोपदिशन्ति, तान्येव असत्काव्यपदवाच्यानि नोपादेयानिच। यतश्च न तैः किंचिदपि सामाजिकश्रेयः साध्यत इति भ्रमोऽपोहा जायते ।

तथैव ‘आन्ध्रशब्दचिन्तामणिः’ इत्याख्यतेलुगुव्याकरणं संस्कृतभाषायां एव व्यरचयत् आदिकविः नन्नयभट्टः । तेलुगुव्याकरणशास्त्रग्रन्थं शास्त्रनिर्माणानुकूलं संस्कृतभाषाम् आश्रित्यैव व्यरचयत् सः। तस्मिन् ग्रन्थे काव्यलक्षणमेवमाह - ‘विश्वश्रेयः काव्यं तददोषौ परिष्कृतौ च वागर्थौ।’[xviii] इति।

कविकुलगुरुकालिदासादिमहाकविभिर्विरचितानि महाकाव्यानि तु प्राजाश्रेयः साधनानिति तानि समुदेयान्येव। विदितमेव यत् कालिदासकविवरः संस्कृतसाहित्यसमुद्रे स्वसूक्तिरत्नानि प्रकाशतेति। निरंतरं सामाजिकचेतना, तमो नाम अज्ञनं दूरीकृत्य आनन्दं प्रसारयन् राराजता इति तस्य हि सूक्तयः नितान्तं मधुरा हृद्याश्च भवन्तीति। तान् उपयुज्य चर्व्यमाणाः पापान्निवारयन्ति, हिताय योजयन्ति, कर्तव्यमुपदिशन्ति,श्रेयः साधयन्ति, रामनीयकमनुभवन्ति, रसानन्दमनुभावयन्ति च।

निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु।
प्रीतिर्मधुरसान्द्रासु मंजरीश्विव जायते ।। [xix]

रघुवंशमहाकाव्ये प्रजाश्रेयसि बद्धादराणां पालकानामिदमेव कर्तव्यं यत् प्रजाः सद्वृत्तसंरक्षने सुशिक्षिताः चोररोगादि भयेभ्यः सुरक्षिताः वृत्यादि कल्पनेन पोषिताश्च यथा भवेयुः तथा विधेयम्। तदेतत् सर्वं वेदयति दिलीपवर्णनप्रस्तावे यथा-

प्रजानां विनायाधानात् रक्षणाद् भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः।। [xx]

अहो सूक्ष्मेक्षिकता कवितल्लजस्य। अत एव सर्वस्यापिवस्तुनः गुणदोशौ स्वयं विविच्य हेयता उपादेयता वा युक्तायुक्तज्ञानपरेण निर्णये। न पर प्रत्ययनेयबुद्धिभिर्भाव्यं। सोऽयमुपदेशः मालविकाग्निमित्रे । यथा-

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद् भजन्ते मूड़ः परप्रत्ययनेय बुद्धिः।। [xxi]

अपरं च क्रोधस्य रजोगुणसमुद्भवत्वेन दुःखमूलत्वात् त्याज्यत्वं समुपदिष्टं सर्वत्र । तस्यापि परं क्रोधः अन्तर्निगूडस्वमहिमप्रख्यापनेन जनं कर्तव्योन्मुखं करोतीति क्वचित् सगुण एवेति न सर्वात्मना परिहर्तव्य इत्युपदेशं ग्राहयति। यथा शाकुन्तले-

ज्वलति चलितेन्थनोग्निः विप्रकृतः फणां कुरुते ।
प्रायः स्वं महिमानं क्रोधात् प्रतिपद्यते जंतुः।। [xxii]

अत एव रघुवंशकाव्यनायकानां राज्ञांसद्गुणानित्थंवर्णयति कविः प्रारम्भे-

शैशवेऽभ्यस्त विद्यानां यौवने विषयैषिणां।
वार्थकेमुनि वृत्तीनां योगेनान्ते तनुत्यजाम्।।
त्यागाय संभृतार्थानां सत्यायमितभाषिणां।
यशसे विजिगीषूणां प्रजायै गृहमेथिनाम्।। [xxiii]

शैशवं हि विद्याग्रहनाय समुचितावस्था। अतः शैशवएव विद्याभ्यासो विधेयः इत्यादि प्रजाश्रेयः साधनकर्तव्योपदेश एव तद्वर्णनेन साध्यः। न केवलं राज्ञां कृते लोकहिताय एव ज्ञायते।

तथैव भागात्स्वरुपः महाराजो भर्तृहरिमहाकविः एवमाह । स प्रतिपादयति पुरस्तात्किल कविताया अकिंचित्करं साम्राज्यम् –“ सुकविता यद्यस्ति राज्येन किम् ” इति युक्तंचेदम्।

प्रजापतिरिरिति अत एवायं प्रजापतिरित्याभिवर्ण्यते आनंदवर्धनेन –

अपारे काव्यसंसारे कविरेव प्रजापतिः ।
यथास्मै रोचते विश्वं तथेदं परिवर्तते ।।

स्रष्टुर्नातिभिन्नो ह्ययं कविरात्मनो। भावनाबलात्सकलमेव जगत् सचराचरं करतलबदरमिवाध्यक्षीकुर्वन् पारयतीदं

यथासमीहितं परिवर्तयितुं भावनानैरन्तर्यसंस्कृतविशुद्धान्तरंगों ह्यसौ -

जानाते यन्न चन्द्रार्कौ जानाते यन्न योगिनः ।
जानीते यन्न भार्गोऽपि तज्जानाति स्वयं कविः ।।

न केवलमतिशयोक्त्याद्युपलक्षितेन वर्णनादिवैचित्र्येण, याथार्थ्यतोपि विश्वमन्यथयितुं प्रभवंतीयं कविता कवयितारं विश्वमोहिनीव माया विशुद्धं, ब्रह्मा, स्रष्टुः पदमध्यारोपयति। अस्य भारतदेशस्य चरितं यदि कदाचिन्न परावर्तिष्यतात्र कवितासुरधुनी वाल्मीकिव्यासयोरिति।
अतश्च पूर्वोक्तं पद्यं किंचिदेवं परिकल्पयामः –

अपारे ह्यत्र संसारे कविरन्यः प्रजापतिः ।
यथास्मै रोचते विश्वं तथापि परिवर्तते ।।

निश्चप्रचंकाव्यशास्त्रविनोदेनलोकजीवनं रसमयंसंतोषकरं भवतीति, सामाजिकव्यवहारं, युक्तायुक्तविचारज्ञानं स्थितप्रज्ञता च लभ्यतेतिस्पष्टम्। इदं वाक्यं इदं वाक्यं वदाम्येव पदे पदे ।

भारते संस्कृतं भाति संस्कृते भातिभारतम् ॥ [xxiv]

**पाददिप्पणीसन्दर्भाः-**

[i]हितोपदेश०मित्र०४८
[ii]नाट्यशास्त्र.६.१०
[iii]साहित्यदर्पण.काव्य.प्र
[iv]काव्यालंकार ०१.२
[v]प्रतापरुद्रीयम् ८
[vi]काव्यप्रकाश:०१.२
[vii]रसगंगाधर०काव्यप्रयोजन
[viii]सू.शतकम् ६ श्लोकः
[ix]तैत्तिरीयोपनिषद्०ब्रह्म०व०
[x]नाट्यशास्त्र. १.११-१२
[xi]नाट्यशास्त्र. १.१७-१८
[xii]नाट्य. ६.३१
[xiii]नाट्यशास्त्र. १.१५
[xiv]नाट्यशास्त्र.१.१५
[xv]नाट्यशास्त्र.१.११५-११६
[xvi]रस.गं. -१
[xvii]तैत्ति०उ०
[xviii]आन्ध्रशब्दचिन्तामणि.१
[xix]-बाणभट्टः
[xx]रघुवंश.१.२४
[xxi]मालविकाग्निमित्र.१.२
[xxii]अभिशा.६.३२
[xxiii]रघु.वं.१.७-८
[xxiv]तिगुल्लश्रीहरिशर्मा

**संदर्भग्रन्थसूची -**


1. हितोपदेशः – चौखम्बा प्रकाशन, वाराणसी
2. नाट्यशास्त्रम् –(तेलुगुव्याख्य), आचार्य पुल्लेल श्रीरामचन्दृदु, हैदराबाद
3. साहित्यदर्पण- चौखम्बा विद्याभवन्, वारणासी
4. काव्यालंकारः – Motilal Banarsidas Publishers Private Limited, Delhi.
5. प्रतापरुद्रीयम् – चौखम्बा कृष्णदास अकादमी, वारणासी
6. काव्यप्रकाशः – चौखम्बा विद्याभवन्, वारणासी
7. रसगंगाधरः – चौखम्बा विद्याभवन्, वारणासी
8. काव्यमीमांसा - शारदा संस्कृत संस्थान, वारणासी
9. सूर्यशतकम् – राष्ट्रीयसंस्कृतसंस्थानम्, नई दिल्ली
10. १०८ उपनिषद् – युग निर्माण योजना,मथुरा
11. रघुवंशम् – कालिदास-ग्रंथावली, चौखम्बा सुरभारती प्रकाशन, वाराणसी
12. आन्ध्रशब्दचिंतामणिः–वाविल्ल रामास्वामिशाश्त्रुलु एंड संस, चेन्नपुरी
13. मालविकाग्निमित्रंम् चौखम्बा सुरभारती प्रकाशन,वाराणसी
14. अभिज्ञानशाकुंतलम् – वाविल्ल रामास्वामिशाश्त्रुलु एंड संस, चेन्नपुरी
15. भर्तृहरि सुभाषितरत्नावाली, (Telugu) J.P. Publications, Vijayawada.